श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

## श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे

# ॥ एकविंशः सर्गः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

**श्री रङ्गरामानुज महादेशिकन्**

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

# ॥ एकविंशः सर्गः ॥

## श्रीरामस्य समुद्रतटे कुशानास्तीर्य दिनत्रयं यावदुपवेशनं ततोऽपि स्वात्मानमदर्शयतः समुद्रस्योपरि कुपितेन श्रीरामेण बाणप्रहारेण तस्य विक्षोभणम्

ततः सागरवेलायां दर्भानास्तीर्य राघवः।
अञ्जलिं प्राङ्मुखः कृत्वा प्रतिशिश्ये महोदधेः॥ **6.21.1** ॥

बाहुं भुजङ्गभोगाभमुपधायारिसूदनः।
जातरूपमयैश्चैव भूषणैर्भूषितं पुरा॥ **6.21.2** ॥

मणिकाञ्चनकेयूरमुक्ताप्रवरभूषणैः।
भुजैः परमनारीणामभिमृष्टमनेकधा॥ **6.21.3** ॥

चन्दनागुरुभिश्चैव पुरस्तादभिसेवितम्।
बालसूर्यप्रकाशैश्च चन्दनैरुपशोभितम्॥ **6.21.4** ॥

शयने चोत्तमाङ्गेन सीतायाः शोभितं पुरा।
तक्षकस्येव सम्भोगं गङ्गाजलनिषेवितम्॥ **6.21.5** ॥

संयुगे युगसङ्काशं शत्रूणां शोकवर्धनम्।
सुहृदां नन्दनं दीर्घं सागरान्तव्यपाश्रयम्॥ **6.21.6** ॥

अस्यता च पुनः सव्यं ज्याघातविहतत्वचम्।
दक्षिणो दक्षिणं बाहुं महापरिघसन्निभम्॥ **6.21.7** ॥

गोसहस्रप्रदातारं ह्युपधाय भुजं महत्।
अद्य मे तरणं वाथ मरणं सागरस्य वा॥ **6.21.8** ॥

इति रामो धृतिं कृत्वा महाबाहुर्महोदधिम्।
अधिशिश्ये च विधिवत् प्रयतो नियतो मुनिः॥ **6.21.9** ॥

तस्य रामस्य सुप्तस्य कुशास्तीर्णे महीतले।
नियमादप्रमत्तस्य निशास्तिस्रोऽभिजग्मतुः॥ **6.21.10** ॥

स त्रिरात्रोषितस्तत्र नयज्ञो धर्मवत्सलः।
उपासत तदा रामः सागरं सरितां पतिम्॥ **6.21.11** ॥

न च दर्शयते रूपं मन्दो रामस्य सागरः।
प्रयतेनापि रामेण यथार्हमभिपूजितः॥ **6.21.12** ॥

समुद्रस्य ततः क्रुद्धो रामो रक्तान्तलोचनः।
समीपस्थमुवाचेदं लक्ष्मणं शुभलक्षणम्॥ **6.21.13** ॥

अवलेपः समुद्रस्य न दर्शयति यः स्वयम्।
प्रशमश्च क्षमा चैव आर्जवं प्रियवादिता॥ **6.21.14** ॥

असामर्थ्यफला ह्येते निर्गुणेषु सतां गुणाः।
आत्मप्रशंसिनं दुष्टं धृष्टं विपरिधावकम्॥ **6.21.15** ॥

सर्वत्रोत्सृष्टदण्डं च लोकः सत्कुरुते नरम्।
न साम्ना शक्यते कीर्तिर्न साम्ना शक्यते यशः॥ **6.21.16** ॥

प्राप्तुं लक्ष्मण लोकेऽस्मिञ्जयो वा रणमूर्धनि।
अद्य मद्बाणनिर्भग्नैर्मकरैर्मकरालयम्॥ **6.21.17** ॥

निरुद्धतोयं सौमित्रे प्लवद्भिः पश्य सर्वतः।
भोगिनां पश्य भोगानि मया भिन्नानि लक्ष्मण॥ **6.21.18** ॥

महाभोगानि मत्स्यानां करिणां च करानिह।
सशङ्खशुक्तिकाजालं समीनमकरं तथा॥ **6.21.19** ॥

अद्य युद्धेन महता समुद्रं परिशोषये।
क्षमया हि समायुक्तं मामयं मकरालयः॥ **6.21.20** ॥

असमर्थं विजानाति धिक् क्षमामीदृशे जने।
न दर्शयति साम्ना मे सागरो रूपमात्मनः॥ **6.21.21** ॥

चापमानय सौमित्रे शरांश्चाशीविषोपमान्।
समुद्रं शोषयिष्यामि पद्भ्यां यान्तु प्लवङ्गमाः॥ **6.21.22** ॥

अद्याक्षोभ्यमपि क्रुद्धः क्षोभयिष्यामि सागरम्।
वेलासु कृतमर्यादं सहस्रोर्मिसमाकुलम्॥ **6.21.23** ॥

निर्मर्यादं करिष्यामि सायकैर्वरुणालयम्।
महार्णवं क्षोभयिष्ये महादानवसङ्कुलम्॥ **6.21.24** ॥

एवमुक्त्वा धनुष्पाणिः क्रोधविस्फारितेक्षणः।
बभूव रामो दुर्धर्षो युगान्ताग्निरिव ज्वलन्॥ **6.21.25** ॥

सम्पीड्य च धनुर्घोरं कम्पयित्वा शरैर्जगत्।
मुमोच विशिखानुग्रान् वज्रानिव शतक्रतुः॥ **6.21.26** ॥

ते ज्वलन्तो महावेगास्तेजसा सायकोत्तमाः।
प्रविशन्ति समुद्रस्य जलं वित्रस्तपन्नगम्॥ **6.21.27** ॥

तोयवेगः समुद्रस्य समीनमकरो महान्।
स बभूव महाघोरः समारुतरवस्तथा॥ **6.21.28** ॥

महोर्मिमालाविततः शङ्खशुक्तिसमावृतः।
सधूमः परिवृत्तोर्मिः सहसासीन्महोदधिः॥ **6.21.29** ॥

व्यथिताः पन्नगाश्चासन् दीप्तास्या दीप्तलोचनाः।
दानवाश्च महावीर्याः पातालतलवासिनः॥ **6.21.30** ॥

ऊर्मयः सिन्धुराजस्य सनक्रमकरास्तथा।
विन्ध्यमन्दरसङ्काशाः समुत्पेतुः सहस्रशः॥ **6.21.31** ॥

आघूर्णिततरङ्गौघः सम्भ्रान्तोरगराक्षसः।
उद्वर्तितमहाग्राहः सघोषो वरुणालयः॥ **6.21.32** ॥

ततस्तु तं राघवमुग्रवेगं
प्रकर्षमाणं धनुरप्रमेयम्।
सौमित्रिरुत्पत्य विनिःश्वसन्तं
मामेति चोक्त्वा धनुराललम्बे॥ **6.21.33** ॥

एतद्विनापि ह्युदधेस्तवाद्य
सम्पत्स्यते वीरतमस्य कार्यम्।
भवद्विधाः क्रोधवशं न यान्ति
दीर्घं भवान् पश्यतु साधुवृत्तम्॥ **6.21.34** ॥

अन्तर्हितैश्चापि तथान्तरिक्षे
ब्रह्मर्षिभिश्चैव सुरर्षिभिश्च।
शब्दः कृतः कष्टमिति ब्रुवद्भि -
र्मामेति चोक्त्वा महता स्वरेण॥ **6.21.35** ॥

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे एकविंशः सर्गः॥